The Maharaja Sayajirao University of Baroda, Vadodara

Department of Traditional Sanskrit Studies, Faculty of Arts

महाराजसयाजिराव-विश्वविद्यालयस्य विनयनविद्याशाखायाः

वाचस्पति: (Ph.D.)

इत्युपाधये प्रस्तुतः शोधमहानिबन्धः

Subject Title (शोधविषय:)

# "JYOTISHIYAHORASANDARBHE NAVMANSHAVARGASYA VISHISHTAMADHYAYNAM"

# "ज्योतिषीयहोरासन्दर्भे नवमांशवर्गस्य विशिष्टमध्ययनम्"


निर्देशकः

डॉ. योगेशकुमार: त्रिवेदी
प्राध्यापकः
पारम्परिक-संस्कृताध्ययनविभाग:
बरोडा संस्कृतमहाविद्यालयः
महाराजसयाजिरावविश्वविद्यालयः
वड़ोदरा, गुजरात

शोधार्थी

विष्णुप्रसादः डी. शर्मा

शोधकेन्द्रम्
बरोडा संस्कृतमहाविद्यालयः
महाराजसयाजिरावविश्वविद्यालयः
वड़ोदरा, गुजरात



Registration No.BSM/05 Date.02/11/2018

वर्षम्- 2023

# प्रतिज्ञापत्रम्

अहं विष्णुप्रसादः डी. शर्मा महाराजसयाजीरावविश्वविद्यालयस्य विनयनविद्या-विभागे वाचस्पति इत्युपाधये डॉ. हरिप्रसादः पाण्डेयः तथा डॉ. योगेशकुमार: त्रिवेदी महोदयानां मार्गदर्शनेन **“ज्योतिषीयहोरासन्दर्भे नवमांशवर्गस्य विशिष्टमध्ययनम्”** इति शीर्षकेण स्वप्रयत्नेन महाशोधप्रबन्धं लिखितवान् । अस्य महाशोधप्रबन्धस्य कृते सर्वाः सामग्र्यः मया मार्गदर्शकमहोदयानां निर्देशानुसारं संशोधननियमानां च पालनपूर्वकं प्रस्तुतमस्ति । अहं प्रतिज्ञां करोमि यत् अस्मिन् विषये पूर्वं कुत्रापि संशोधनकार्यं न जातं तथा कस्मैचिदपि उपाधये एषः शोधप्रबन्धः प्रदत्तः नास्ति । मदीयं शोधकार्यं सर्वथा मौलिकत्वमावहते ।

**शोधार्थी**

विष्णुप्रसादः डी. शर्मा

**डॉ. योगेशकुमार: त्रिवेदी**
प्राध्यापकः
पारम्परिक-संस्कृताध्ययनविभाग:
बरोडा संस्कृतमहाविद्यालयः
महाराजसयाजिरावविश्वविद्यालयः
वड़ोदरा, गुजरात

**निवास:**
A/02 ताराबाग, पॉलिटेकनिक कॉलेज
शास्त्री ब्रिज, बरोडा

---

# निर्देशक प्रमाणपत्रम्

मया प्रमाणीक्रियते यत् श्री विष्णुप्रसादः डी. शर्मा इत्यनेन शोधछात्रेण "ज्योतिषीयहोरासन्दर्भे नवमांशवर्गस्य विशिष्टमध्ययनम्" इति विषयमधिकृत्य मम निदर्शने पूर्णमनोयोगेन स्वीयं शोधकार्यं समपादि। प्रस्तुतोऽयं शोधप्रबन्धः होराशास्त्रस्य तथा च होराशास्त्रे वर्णितनवांशविषयस्य सम्यग्ज्ञानाय उपयुक्तो भविष्यतीति मे मतिः। कार्यमिदं सर्वथा मौलिकं विद्यते। अतोऽयं शोधप्रबन्धः परिक्षार्थं प्रस्तौमि।

**निर्देशकः**

डॉ. योगेशकुमार: त्रिवेदी

# अनुक्रमणिका

१. प्रास्ताविकम्

२. प्रकरणम् – १. संस्कृतवाङ्गमये ज्योतिषशास्त्रस्य वैशिष्ट्यम्

(अ) ज्योतिषशास्त्रस्य परिचयः

(ब) ज्योतिषशास्त्रस्योत्पत्ति:

३. प्रकरणम् – २. प्राग्वैदिककाले ज्योतिषस्य स्वरूपं विषयोपभेदाश्च

४. प्रकरणम् – ३. ज्योतिषशास्त्रस्य वेदाङ्गत्वम्

(अ) पुराणेषु ज्योतिषम्

(ब) महाकाव्येषु ज्योतिषस्य निरुपणम्

५. प्रकरणम् – ४ ज्योतिषशास्त्रे होराया: परिज्ञापनम्

६. प्रकरणम् – ५ होराशास्त्रे नवमांशस्य मीमांसा

७. प्रकरणम् – ६ नवमांशप्रतिपाद्यविषयसमीक्षा

(अ) नाडीग्रन्थेषु नवमांशविचारः

(ब) नवमांशवैशिष्ट्यं तथा फलनिरुपणम्

८. प्रकरणम् – ७ नवमांशे समीक्षात्मकं मूल्याकनम्

९. उपसंहार:

१०. सन्दर्भग्रन्थसूचिः (आधारभित्तिग्रन्था:)

## प्रास्ताविकम्

संस्कृतवाङ्मयं हि विश्ववाङ्मयसमुदाये मूर्द्धन्यमिति न सम्भवति कस्याऽपि विमतिः । अस्य हि विस्तृतं सुसमृद्धश्च सर्वाङ्गपूर्णकलेवरं सर्वानपि विस्मापयतीति नैवात्युक्तिः । अत्रत्यो हि शासत्वं सार्वभौमत्वञ्च ज्ञाननिधिरणाधिकालादारभ्य साम्प्रतिकयुगपर्यन्तमपि अनवरतरूपेणोपचीयमानो दृश्यते । वाङ्मयमिदमेवादाय - **'यन्नेहाऽस्ति न चान्यत्र यदिहास्ति न तत्क्वचित्'** इत्युक्तिश्चरितार्था: दृश्यते । **'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः'** इत्यादिकर्मप्रवृत्त्युपदेशपरमन्त्राश्च यद्येकत्र सन्त्यत्र तथैवापरत्र **'अविद्या मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते'** इति – प्रभृतिनिवृत्त्युपदेशपरवचनान्यपि लक्ष्यन्तेऽत्रैव । अनेन सिध्यति यदस्य वाङ्मयस्य मूलतो द्वौ भागौ -अविद्या विद्या चेति । अविद्याऽपरेत्युच्यते विज्ञानशब्देनाऽपि ज्ञायते, एवञ्च विद्या पराशब्देन ज्ञानशब्देनाऽपि ज्ञायते । पुरुषार्थसिद्धिरेवाऽस्य वाङ्मयस्य चरमं लक्ष्यम् । पुरुषार्थश्च चतुर्विधो धर्मार्थकाममोक्षभेदेन । तत्र धर्मो हि बुद्धेर्विषयः सदसद्विवेकलक्षणः अर्थश्च शरीरविषयो व्यवहारलक्षणः । कामो हि मनसो विषयो भोगलक्षणः । मोक्षस्तु आत्मनो विषयः चरमनिवृत्तिलक्षणः । एषां हि यथायोग्यप्रवृत्तिनिवृत्त्युपदेशप्रतिपादनवैलक्षण्यमेवाऽस्य वैशिष्ट्यम् । उक्तमेव –

**'धर्मार्थकामाः सममेव सेव्या यो ह्येकभक्तः स नरो जघन्य'** इति । धर्मानुरोधेनार्थ-स्यार्थस्यानुरोधेन कामस्य मोक्षानुरोधेन सर्वेषामुपयोग एवास्य परमः सन्देशः । तेन जनस्य मोक्ष एव चरमो लक्ष्यः । किन्तु स तु तुरीयः पादः । पादत्रयमतिक्रम्यैव तत्र गन्तुं शक्यते । धर्मा अनुष्ठेया, अर्थाश्चोपार्जनीयाः, कामाश्च सेव्यास्तत एव मोक्षे रतिः सम्भवतीति तदनुरोधेन मानवजीवनमपि ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसंन्यासावस्थाभेदेन चतुर्धैव विभक्तमस्ति । आपञ्चविंशतेर्ब्रह्मचारी भवति प्रवृत्तिनिवृत्तिज्ञानादिकमुपार्जयति । स्नातकश्च स

2

गृहस्थाश्रमं प्रविशति विविधैर्भोगैरिन्द्रियाणि सन्तर्पयति यथायोगमापञ्चपञ्चाशत्तमात् । तृप्तेन्द्रियश्च स वानप्रस्थं प्रविशति चरति च विविधं तपो विषयान्मनोनिवर्तनायापञ्चसप्ततेः । विषयव्यावृत्तात्मा स संन्यासमधिगच्छति त्यक्तसर्वपरिग्रहो यावज्जीवं त्यक्तकलेवरश्च परमेशानमाप्नोतीति सुव्यवस्थापिता जीवनचर्याऽत्र । तदित्थं सर्वाङ्गपूर्णं वाङ्मयमिदं निवृत्तिमार्गमात्रोपदेशकमकर्मण्याधिवक्तृ च यदि कश्चिन्मन्यते स देवानां प्रिय एव । न केवलमत्र पुरुषार्थसिद्धिरेव वर्णिताऽपितु तत्तन्मार्गव्याख्यातृणि शास्त्राण्यपि प्रथितानि सन्ति । समस्तमपि वाङ्मयं मूलतश्चत्वारो वेदास्तस्य षडङ्गानि- न्यायो, मीमांसा, धर्मशास्त्रञ्चेति चतुर्दशधा विभक्तमस्ति । तेषाञ्च शाखाः प्रशाखाश्च सहस्रधा विभक्ता व्याख्याताश्च सन्ति । मूलतश्चत्वारो वेदाश्चतस्रो मूलसंहिता वा ऋग्यजुःसामाथर्वाख्याः । तत्रापि ऋच एवैकविंशतिः शाखाः, यजुषः शुक्लभागे पञ्चदश, कृष्णभागे षडशीतिरिति एकोत्तरशतं शाखाः । सहस्रवर्त्मा सामवेदः, अथर्वश्च नवविध इति । एतासां शाखानां प्रत्येकब्राह्मणग्रन्था, आरण्यकानि, उपनिषदश्चेति को नाम ताः परिगणयितुं प्रभवति । मूलसंहितानां प्रत्येकं पुनरुपवेदाः क्रमेण आयुर्धनुर्गान्धवार्थाख्याः । तत्रापि सर्वेषामेव प्रत्येकं शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दो, ज्योतिषमिति षडङ्गानि । एषामपि सन्त्यनेकान्युपाङ्गानि असङ्ख्येयानि शास्त्राणि च प्रत्येकं कतिपयस्वविभागेषु विभक्तानि भवन्ति, यथा ज्योतिषं हि शास्त्रं सिद्धान्तसंहिताहोराख्येषु त्रिषु स्कन्धेषु विभक्तमस्ति ।

इत्थं हि प्रवृत्तिनिवृत्तिमार्गनिर्देशनपरं हि वाङ्मयमिदं कलेवरेण गुणेन च सर्वाण्यतिशेते इति न प्रमादिकम् ।

**प्रकरणम् – १ संस्कृतवाङ्गमये ज्योतिषशास्त्रस्य वैशिष्टयम् |**

**(अ) ज्योतिषशास्त्रस्य परिचयः**



3

ज्योतिषमेकमागमशास्त्रमस्ति । ज्योतिषशास्त्रं विज्ञानमेवास्ति । तत्र नास्ति मतद्वयम् । ज्योतिषशास्त्रस्यान्तर्गताः अनेकविधाः विभागाः सन्ति । ज्योतिषशास्त्रे अनन्तगूढार्थ-विषयाः सन्ति ।

वर्तमानकालानुसारेण ज्योतिषशास्त्रस्य उपयोगिता कया रीत्या भवति ? वर्तमानसमये एतस्य ज्योतिषशास्त्रस्य पूर्वार्धभागः मान्यरूपेण स्वीकृतोऽस्ति । अधुना भारतवर्षस्य एतत् – विषय सम्बन्धी अनेकविधशाखायां विज्ञानेन प्रमाणतया अधिकारः नैव भवति । एतत् सत्यमस्ति ।

ज्योतिषशास्त्रम् किमस्ति ? - सूर्यादि ग्रहाणां स्थित्यनुसारेण मनुष्येषु उत्पत्तिः एवं स्थितिः तथा विकासः तेषां त्रयाणां विषये अनुकूलं तथा प्रतिकूलं विषयं ज्ञातुं शक्यते तत् शास्त्रस्य नाम ज्योतिषशास्त्रमस्ति ।

ज्योतिषशास्त्रम् 'सूर्यादिग्रहाणां बौधकशास्त्रम्' तथा 'कालगणना' प्रकार एव अस्ति । प्राचीनकाले ब्रह्म-शौनक-भृगु-च्यवन-बृहस्पति-वशिष्ठ-पाराशर-अत्रि-मनु-पौलस्त्य-लोमश-मरिचि-अंगिरा-जैमिनी-व्यास-नारद-गर्ग-आर्यभट्ट-लल्ल-लगध-ब्रह्मगुप्त-वराहमिहिर-श्रीपति-भास्काराचार्य-मुनिश्वर-ज्ञानराज-कमलाकरभट्टाः एतेः प्राधान्यज्योतिषकारविद्वांसः सन्ति । नवीनेषु नीलाम्बर-बापूदेव-सुधारकर-शङ्करबालकृष्ण-योगेन्द्रचन्द्रकेतकर-आप्टेप्रभृतयो विद्वासः परिगण्यन्ते गणकत्वेन ।

ब्रह्मदेवानुसारेण ज्योतिषशास्त्रस्य एकं नाम वेदनेत्रमस्ति । वेदस्य हि षटस्वङ्गेषु ज्योतिषमन्यतममिति तूक्तमेव । ज्योतिषं हि वेदस्य चक्षुरूपमस्ति ।

वेदस्य षड् अङ्गानि, यथोक्तं पाणिनिना स्वशिक्षायाम् –

यथा –

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।**
**ज्योतिषामयनं चक्षुर्निरूक्तं श्रोत्रमुच्यते ॥**

4

**शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥**

**पा.शि. ४१-४२ ।**

तथा नेत्रं विना समस्त जीवनम् अन्धकारमेव भवति । नेत्रं विना अङ्गानि-प्रत्यंगानि च परिपूर्णानि नैव भवन्ति । तथैव ज्योतिषं विना समस्तशास्त्राणि अपूर्णानि भवन्ति । अन्येषुशास्त्रेषु वादः विवादश्च अधिक: भवति । ज्योतिषशास्त्रं विना जनानां जीवनं निरर्थकमस्ति । किन्तु नैत्रसंज्ञकं-निर्मलं-निष्कंलकं ज्योतिषशास्त्रं प्रत्यक्षचमत्कृतशास्त्रमस्ति ।

**अप्रत्यक्षाणि च शास्त्राणि विवादस्तेषु केवलम् ।**
**प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रकौं यत्र साक्षिणौ ।**

ज्योतिशषास्त्रस्य प्रत्यक्षदर्शिरूपेण सूर्यः चन्द्रमाः च उभौ स्तः । ज्योतिषशास्त्रे प्रत्यक्षं ग्रहगणितमस्ति । कारणं चन्द्रस्य शृङ्गोन्नति-ग्रहणं-प्रतियुति-ग्रहच्छाया-ग्रहस्यउदयास्तसमयानुसारेण निर्णयं कर्तुं शक्यते, तद् शास्त्रं ज्योतिषमस्ति | ज्योतिषशास्त्रद्वारा मानवः सत्यम् उपयुक्तं च मार्गदर्शनं कर्तुं शक्यते । अपरिमिते गगनमण्डले यानि हि तेजोमयानि बिम्बानि दृश्यन्ते तानि सर्वाण्येव समष्ट्या 'ज्योतिः' शब्देन उच्यन्ते । तेष्वपि यानि हि सदैकरूपगतीनि तानि नक्षत्रशब्देन ज्ञायन्ते ।

ज्योतिशास्त्रं प्राचीनार्वचीनग्रन्थनुसारेण ज्योतिषे त्रयः स्कन्धाः सन्ति ।

**सिद्धान्त संहिता होरा रूपं स्कन्धत्रयात्मकम् ।**
**वेदस्य निर्मलं चक्षुः ज्योतिः शास्त्रमनुत्तमम् ॥**

शास्त्रमिदं सिद्धान्त-संहिता-होराभेदेन त्रिषु स्कन्धेषु विभक्तम् अस्ति अतएव ज्योतिःशास्त्रं त्रिस्कन्धज्योतिषशब्देन अपि ज्ञायते ।

त्रयः स्कन्धाः एवमेव सन्ति ।

(१) सिद्धान्तः

(२) संहिता

(३) होरा

**सिद्धान्ते -**

गणितं-खगोलं-ग्रहगणितं-पाटीगणितं-बीजगणितं-कालनिर्णयम् एते विभागाः सन्ति । ब्रह्म-वशिष्ठः-सोमःसूर्यश्चेत्यस्य प्रवर्तकाः सन्ति । सिद्धान्तग्रन्थस्य विविध-आचार्याः अनन्तरमार्यभट्ट-ब्रह्मगुप्त-वराहमिहिर-भास्कराचार्य-कमलाकरप्रभृतयः । आर्षः-सूर्यसिद्धान्तः, आर्यभट्टस्य आर्यभट्टीयं, ब्रह्मगुप्तस्य ब्रह्मस्फुटसिद्धान्तः, वराहमिहिरस्य पञ्चसिद्धान्तिका, भास्कराचार्यस्य सिद्धान्तशिरोमणिः, कमलाकरस्य सिद्धान्ततत्वविवेकश्च सिद्धान्तस्कन्धस्य मान्यग्रन्थाः सन्ति ।

**संहितायां –**

मुहूर्तं-कालचक्रनिर्णयमस्ति । आर्षत्वेन बार्हस्पत्य-काश्यप-नारदसंहिताः सम्प्रति दृश्यन्ते । यद्यपि बहवः ऋषयः संहितायाः कर्तृत्वेन स्मृता दृश्यन्ते तत्र तत्र । वराहमिहिरस्य बृहत्संहिता विषयेऽस्मिन् प्रामाणिको ग्रन्थः ।

**होरा –**

जातकं-ताजिकश्च

अयमेव विभागः फलितज्योतिषनाम्नाः अपि व्यवह्रियते । वराहमिहिरस्य बृहज्जातकम्, नीलकण्ठस्य ताजिकनीलकण्ठी च विषयेऽस्मिन् प्रामाणिकौ ग्रन्थौ ।

**ज्योतिषशास्त्रशास्त्रस्य विकास –**



6

ज्योतिषशास्त्रमपि शास्त्रान्तरवत्कतिपयावस्थामतिक्रम्य साम्प्रतिकाम् अवस्थां
प्राप्नोति । मानवस्य मौलिकप्रवृत्तिः जिज्ञासा एवास्ति ।

यथाहि- स भोक्तुम् इच्छति – पातुम् इच्छति – रन्तुम् इच्छति – आत्मानं प्रकटयितुम् इच्छति तथैव स स्वं परञ्च ज्ञातुम् इच्छति । ज्ञानस्याविष्कारिणी जिज्ञासा एव अस्ति । ग्रहनक्षत्रविषयकजिज्ञासा एव ज्योतिषशास्त्रस्य आविर्भावहेतुः । व्यवहारे पशुवद् तिष्ठन् मानवोऽनादिकालाद् एव दिवस-रात्रि-अयनादिविषये स्वल्पम् अपि जानाति स्म । ज्योतिशास्त्रस्य विकासः पञ्चसु अवस्थासु विभक्तः दृश्यते-प्राग्वैदिककालः वैदिकसंहिताकालः, वेदाङ्गकालः, सिद्धान्तकालः, आधुनिककालश्च इति अथवा अज्ञातकालः, आदिकालः, पूर्वमध्यमकालः, उत्तरमध्यमकालः आधुनिककालश्च इति । अस्य हि प्राग्वैदिककालऽज्ञातकालो वा नितान्तः एव ज्ञातोऽस्माभिः । वैदिकसंहितासु यादृशं ज्योतिषस्य स्वरूपं लभ्यते तदाधारेण वयम् अनुमातुं प्रभवामो यत्तत्पूर्वम् अपि ज्योतिषस्य यत्किञ्चदपि स्वरूपं सुनिश्चितम् आसीत् इति । वैदिककालः ऋग्वेदकालाद् आरभ्य लगधपर्यन्तं चलति । आधुनिककाले ज्योतिषे वराहमिहिरस्य अतिशयः प्रभावः वर्तते । तस्य त्रयः स्कन्धा ज्योतषशास्त्रस्य विषये अतीवमहत्त्वपूर्णप्रभावशीलाः अभवन् । उत्तरमध्यमकाले यवनगणकैः तथा आरवगणकेन सह भारतीयगणकानां सम्मलने तेषां सम्पर्केण च ज्योतिषशास्त्रे विविधस्तरे नाविन्यं प्रविष्टम् । तस्य फलं ताजिकम् एव अस्ति | नीलाम्बरादारभ्य आङ्गलसम्पर्केण गणिते नूतना परिपाटी प्रविष्टा । एतेषां सम्पर्केण भारतीयज्योतिषे किञ्चिन्मौलिकं सञ्जातम् । तथापि भारतीयज्योतिषे स्वकीयं वैशिष्टयम् अतीव सुदृढमस्ति ।

**ज्योतिषशास्त्रस्योत्पत्तिः –**

जगतः पितामहः ब्रह्मा हि यज्ञसाधननिमित्तं चतुर्भ्यः मुखेभ्यश्चतुर्णां वेदानां निर्माणं कृतवान्, ते च यज्ञाः कालाश्रयेणैव सिद्ध्यन्ति इति । तत्सिद्धर्यर्थं

कालबोधकज्योतिषशास्त्रनिर्माणं भवति । नारदश्च अस्य शास्त्रस्य महत्त्वं अङ्कीकृत्य लोके प्रवर्तयामास इति । मतमतान्तरानुसारेण शास्त्रं प्रथमं सूर्यमुखेन उक्तम्, ततश्च जगति प्रवर्तितम् इति । इत्थं ज्योतिषशास्त्रं वेदशाखा एव विद्यते । कश्यपसंहितानुसारेण ज्योतिषशास्त्रस्य प्रवर्तका अष्टादशमुख्याचार्याः सन्ति । ते च यथा –

**सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः ।**

**कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः ॥**

**रोमशः पौलिशश्चैव च्यवनो यवनो भृगुः ।**
**शोनकोऽष्टादशश्चैते ज्योतिः शास्त्र प्रवर्तकाः ॥**

पराशरस्तु एवमेव मुख्याचार्यः सन्ति

**विश्वसृङ् नारदो व्यासो वशिष्ठोऽत्रिः पराशरः ।**
**लोमशो यवनः सूर्यश्च्यवनः कश्यपो भृगुः ॥**

**पुलस्त्यो मनुराचार्यः पौलिशः शौनकोऽङ्गिराः ।**
**गर्गो मरीचिरित्येते ज्ञेया ज्योतिः प्रवर्तकाः ॥**

नारदस्त्वथ तानित्थंमाह

**ब्रह्माचार्यो वशिष्ठोऽत्रिर्मनुः पौलस्त्यरोमशौ ।**
**मरीचिरङ्गिरा व्यासो नारदः शौनको भृगुः ॥**

**च्यवनो यवनो गर्गः कश्यपश्च पराशरः ।**
**अष्टादशैते गम्भीरा ज्योतिः शास्त्रप्रवर्तकाः ॥**

यज्ञ-

**अद्ययनसङ्क्रान्ति ग्रह-षोडश कर्मणाम् प्रयोजनस्य सिद्ध्यर्थे तत्कालविनिर्णयात् ॥**

**एतेषां विहीनः श्रोतं-स्मार्तं कर्मं न सिद्ध्यति |**

**ते दृष्टवा जगद्धितायेदं ब्रह्मणा रचितं पुरा ॥**

**तं विलोक्याथ तत्सूनुर्नारदो मुनिसत्तमः ।**
**उक्त्वा स्कन्धद्वयं पूर्वं संहितास्कन्धमुत्तमम् ॥**

**जातकानां शुभाशुभफलं ज्ञातुं शक्यते तदनुसारं ।**
**होरास्कन्धशास्त्रव्यवहारे प्रसिद्धं ज्ञायते ॥**

ब्रह्मणा उक्तं शास्त्रं हि ज्योतिः शास्त्रम् | ब्रह्मः नारदाय, सोमः शौनकाय, नारायणो वशिष्ठाय, रामेशाय च वशिष्ठो, माण्डव्यवामदेवाभ्यां व्यासः, स्वशिष्याय सूर्योमयाय, पुलस्त्यः आचार्यः गर्गाय, अत्रिः रोमकाय, स्वस्वशिष्येभ्यः, पराशरो मैत्रेयाय चोक्तवन्तः इति ।

अस्य शास्त्रस्य प्रथमं ब्रह्मणा यज्ञप्रवर्तनाय रचनाकृता । तत्पश्चात् शिष्यपरम्परा माध्यमेन एतस्य शास्त्रस्य विस्तारः अभवत् । तदेव आर्यभटेन प्रकाशितं, वराहमिहिरेण च विवेचनं कृतम् । अथ च वराहमिहरः उक्तवान् –

**प्रथममुनि कथितमवितथवलोक्य ग्रन्थविस्तरस्यर्थम् ।**
**नातिलघुविपलरचनाभिरूधतः स्पष्टमभिधातुम् ॥**

अतः ज्योतिषशास्त्रस्य उत्पत्तिः विविधः मतेन ज्ञायते ।

## प्रकरणम् . २ प्राग्वैदिककाले च ज्योतिषस्वरूपम्

प्राग्वैदिककालो हि वेदमन्त्रसङ्ग्रहादपि प्राचीनतरः कालः । न स ह्यस्माकं ज्ञानविषयः । तदा ज्योतिषशास्त्रस्य तु का वातऽपितु तद्योनेर्वेदस्यैव कि स्वरूपमासीदित्यपि अनुमातुं वयं नैव प्रभवामः । एतावदेव तद्विषये वक्तुं पार्यते यत्तदाऽपि ज्योतिषविषये स्वल्पमपि ज्ञानमवश्यमेवाऽऽसीद्यस्य यथायथं वा



9

विकसितरूपं वेदमन्त्रेषु दृश्यते । **'अग्निः पूर्वेभिः ऋषिभिरीड्यो नूतनैरिह' 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः' इति शुश्रूम धीराणां ये नस्तद्वयाचचक्षिरे'** इत्यादिकथनैरेतत्सिद्ध्यति । सम्प्रत्यपि ग्रामीणजना दिगवबोधाय ध्रुवादिनक्षत्राणां समयज्ञानाय रात्री कृत्तिकानां साहाय्यं गृह्णन्ति । दिवा तु ते सूर्यगतिमधीत्य समयज्ञानं कुर्वन्ति सुदिने । सम्भवत्येतदज्ञातयुगस्यैवावशिष्टम् । ऋग्वेदे **'देवानां पूर्वे युगेऽसतः सदजायत । देवानां युगे प्रथमेऽसतः सदजायत'** इति यत्कथितं यच्च यः पश्यादुत्तरे युगे इत्यप्युक्तं तस्यायमेवाशयो भवितुमर्हति यद्वैदिकसंहितापूर्ववतकालेऽपि काचन विशिष्टां सभ्यताऽऽसीदिति ।

वेदा हि नैव निश्चयेन ज्योतिषशास्त्रमात्रमुद्दिश्य प्रवृत्ताः । तेन तत्र नैतादृशः प्रसङ्गो येन ज्योतिषशास्त्रं व्याख्यातं स्यात् । तथापि इतरविषयप्रसङ्गवशाज्ज्योतिषविषयेऽपि यत्किञ्चिदुक्तं तेनैतज्ज्ञायते यत्तदाऽपि शास्त्रेऽस्मिन् मानवीयं ज्ञानं समृद्धमासीत् । तत्र तत्र गगनमण्डलं, सूर्याचन्द्रमसौ, नक्षत्राणि, ताराः, ऋतून्, मासान्, दिवसाँश्चादाय मनोहारि चमत्कारि वर्णनं समुपलभ्यते । प्रकरणेऽस्मिन् वेदशब्देन कात्यायनप्रतिज्ञासूत्रमनुसृत्य तस्य संहिता-ब्राह्मणभागगौ गृहीतौ, मन्त्रब्राह्मणयोर्वेदनामध्येयमित्युक्तेः ।

आकाशमधिकृत्य तत्रोक्तं यद्यः स आकाशः स आदित्य एव । एतस्मिन्नुदिते सर्वमिदमाकाशते । इन्द्र एंव स इति । तेन हि आकाशते द्योतते इत्याकाशः । तत्र पृथिव्या उपरिष्टादन्तरिक्षस्य तदुपरिष्टाद् दिवः प्रतिष्ठा वर्णिता । दिवि मेघस्यान्तरिक्षे वायोश्च स्थितिरपि वणितो दृश्यते । यथा -

**'नमोस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः ।**

**'नमोस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः ।**

एवमेव द्यावापृथिवीविषये तत्रोक्तम् -

**'यदा वै द्यावापृथिवी संज्ञानाथेऽथ वर्षति ।'**



10

**'प्राणोदानी वै द्यावापृथिवी ।**

**'इमौ वै लोकौ रेतः सिञ्चाविमौ ह्येव लोकौ रेतः सिञ्चत इतो वा अमृध्वं रेतः सिञ्चति धूमं साऽमुत्र वृष्टिर्भवति तामसावभुती वृष्टि तदिमा अन्तरेण प्रजायन्ते ।'**

ऋग्वेदेऽप्युक्तम् -

**'तिस्रो द्यावः सवितुर्दा उपस्था एका यमस्य भुवने विराषट् । आणि न रथ्यममृताभितस्थुः ।'**

विराजमधिकृत्य तत्रोक्तम् -

**'नाभ्या आसीदन्तरिक्ष शीष्र्णो द्यौः समवर्तत ।**

**पद्भ्यां भूमिदशः श्रोत्रात्तथा लोकानकल्पयन् ॥'**

**'चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत ।**

**श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।।'**

## प्रकरणम् 3 ज्योतिषशास्त्रस्य वेदाङ्गत्वम् |

**ज्योतिषं** वेदस्य नैजं ज्यौतिषायत्तमतं ज्यौतिष्, ज्योतिषशास्त्रस्य वेदाङ्गत्वं स्वीकृतम् । अयमर्थः उक्तः आर्षज्योतिषे, यथा —

**'वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः॥**

**तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञा**

**'वेदास्तावत् यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण॥**

**शास्त्रादस्मात् कालबोधो यतः स्यात् वेदाङ्गत्वं ज्यौतिषस्योत्तमस्मात्॥'**[1]

वेदाङ्गज्यौतिषस्य सम्मत्यां ज्यौतिषसमयो वेदाङ्गेषु मूर्धस्थानीयोऽस्ति -

**'यथा शिखामयूराणां नागानां मणयो यथा।**

**तद्वद् वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम् ॥'**

गच्छता कालेन शास्त्रमिदं संहितागणितजातकाख्येषु त्रिषु भागेषु आत्मानं प्रकटीचकार । आर्यभट्ट-वराहमिहिर-ब्रह्मगुप्त-भास्कराचार्य-प्रभृतयः विश्वविदिताः ज्योतिविदः अद्भुतान् सिद्धान्तान् अवतार्य शास्त्रमिदम् अभिनवेन रूपेण विभूषयाञ्चक्रुः । शास्त्रमिदं त्रिकालवर्त्तिनीम् अपि स्थितिं करतल-आमलकवत् करोति । एतेन परोक्षं भाविकालस्थितञ्च वस्तु प्रत्यक्षं जायते ।

ज्योतिर्महिम्नि उक्तम् —

**'वेदस्य निर्मलं चक्षुः ज्योतिःशास्त्रमकल्मषम्।**

**विनेतदखिलं श्रौतं स्मातं कर्म न सिद्ध्यति।।'**

सर्वाण्यपि दर्शनानि, सकलानि शास्त्राणि, सर्वाश्चोपनिषदो येषां हि परमरहस्यभूतानां वेदानां सौन्दर्यसुधां सततमहर्निशं पिबन्त्योऽपि न तृप्यन्ति, तेषां वेदाननुशीलयितुं शाकल्य-आत्रेय-गार्ग्य-स्कन्दस्वामि-माधवभट्ट-नारायण-उद्गीथ-वेङ्कटमाधव-आनन्दतीर्थ-भवस्वामि-गुरुदेव-क्षुर-भट्टभास्करमिश्र-उव्वट-महीधर-भरतस्वामि-गुणविष्णु-सायण-प्रभृतयः प्रयासं चक्रिरे । देशान्तरीयाः अपि विपश्चितो वेदामृतं पातुं तान् व्याख्यातुं वा अध्येतुं प्रायतन्त ।

यज्ञान् प्रतिपादनाय एव वेदाः प्रवृत्ता अजायन्त । तेषां हि यज्ञानां विधानं चेत् समुचिते काले विधीयते तदैव तत्फलं लभ्यते । ज्यौतिःशास्त्रं यज्ञविधानस्य युक्ततरं कालं निर्दिशति, तस्मात् शास्त्रं तत्कालविधायकशास्त्रमित्येतेन च नाम्ना प्रख्यातं वर्त्तते ।

मानवः स्वभावेन एव स्वकल्याणाभिनिवेशी प्राणी वर्त्तते । सः सर्वदैव अभिलषति यत्, तदीयं कार्यं शुभे समये मङ्गलवर्षिण्यां वेलायां प्रारब्धं स्यात्, येन स मनोभिलषितं संलब्धुं शक्नुयात् । आपदस्तं न निपीडयेयुः दुखप्रदा घटना, भयावहा

स्थितयो मनोरथविध्वंसिनः प्रत्यूहाः, अनिष्टकारिण्यो दारुणा घटिकाश्च न तं निपातयेयुः इत्येतदर्थं स तद्विषये कृत्स्नतया ज्ञानमधिगन्तुं वाञ्छति, येन तदागमनात् प्रागेव सावधानोऽभवत्, तन्निवारणाय क्षमः सञ्जायेत वा । सकलस्यापि भाविनः अनेहसो ज्ञानमसौ करतलामलकवत् कर्त्तुम् उत्कण्ठते । ज्यौतिषं शास्त्रं मानवस्य आकाङ्क्षां सर्वथैव पूरयति । तच्छास्त्रं मानवं प्रति तदीयं भाविकालं सम्यक् ज्ञापयति। कस्मिन् काले का घटना घटेत, कस्मिन् काले कासां कासाम् आपदाम् आगमनस्य सम्भावनाः, कस्मिन् काले तदीयो भाग्योदयो भवेत्, कस्मिन् काले शत्रुरोगादिकं तं व्यथयेत्, जगति कस्मिन् कस्मिन् काले का का ईतिर्भीतिश्च समागच्छेत्, कदा किं जायत इत्यादिको निखिलमपि शास्त्रमिदं सर्वाङ्गीणतया बोधयति । तस्मात्कारणात् शास्त्रमेतद् जनप्रसिद्धम्। लोकपरमोपकारित्वाद् इदं शास्त्रं सर्वेषां मानवानां नितान्तं प्रियशास्त्रं मन्यते । लोकः शास्त्रमिदं स्वकीयशुभविधायकं मित्रमवगच्छति । दुःखानां निवारकत्वात् सुखानां विधायकत्वाच्च तस्य तस्य सर्वेऽपि जगतीतलस्य मानवास्तस्मिन् अादरधियं प्रदर्शयन्ति ।

**प्रकरणम् ४.ज्योतिषशास्त्रे होरायाः परिज्ञापनम् |**

कालवाचकस्य अहोरात्रस्य आद्यन्ताक्षरविलोपात् होराशब्दस्य निष्पत्तिर्भवति यथोक्तं –**'होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात्"** | 'होरा' इत्येतेन लग्नस्य तथा राशेरर्धभागस्यापि ज्ञानं भवति | होरासम्बन्धितं शास्त्रं होराशास्त्रमुच्यते | अस्मिन् होराशास्त्रे कस्यापि पुरुषस्य जन्मकुण्डलिविनिर्माय द्वादशभावेषु राशिषु च ग्रहाणां स्थितिवशात् बलाबलज्ञानपूर्वकं दशान्तरदशाज्ञानञ्च कृत्वा सुखदुख–इष्टानिष्ट-उन्नतयवनन्ति–भाग्योदयादीनां मानजीवने घटितघटनां सर्वेषां पक्षाणां ज्ञानं विवेचनञ्च क्रियते | भट्टोत्पलः कथयति – **'प्रतिष्ठायात्राविवादिनां लग्नग्रहवशेन च शुभाशुभफलं जगति यया निश्चियते सा होरा '|**

जातकस्य जन्मपत्रमाध्यमेन पूर्वजन्मनि कृतस्य प्रारब्धकर्मणश्चाधारेण जातकः अस्मिन् जन्मनि किं शुभाशुभफलं अवाप्स्यतीति व्यपदिश्यते | अतः शुभाशुभकर्मफलसूचकं शास्त्रं होराशास्त्रमिति | सिद्धान्तशिरोमणौ वासनाभाष्ये विहितं यत् प्रारब्धकर्मप्रदर्शकं जातकशास्त्रम् | यथोक्तं – '**जातकशास्त्रं प्रारब्धर्मविपाकव्यञ्जकम्'** |

- **होराशास्त्रस्य वैशिष्टयम् –**

**'अभिधेयं तु जगतः शुभाशुभनिरूपणम् '** इति महर्षिनारदोक्तवचनेन सिध्यति यदस्य समस्तजगतः शुभाशुभनिरुपणमैव होराज्योतिषशास्त्रस्य प्रयोजनमस्ति | मानवजीवनस्य पथप्रदर्शकः वर्तते होराशास्त्रम् | जन्मकुण्डलीमाधृत्य द्वादशभावानां शुभाशुभफलविवेचनमेव होराशास्त्रस्य प्रधानविषयोऽस्ति | लग्नमाध्यमेन भचक्रस्य द्वादशभावेषु विभाजनं क्रियते | तेषां ग्रहाणां शुभाशुभगुणाऽऽधारेण प्राणिनः शुभाशुभफलकथनं भवति | कुण्डली हि मानवस्य पूर्वजन्मार्जितानां कर्मणां मूर्तिमान् रूपं भवति | यथा विशालवटवृक्षस्य समावेशः तस्य बीजाङ्कुरे भवति, तथैव प्रत्येकमानवस्य पूर्वजन्मान्तरकृतकर्माणि जन्मकुण्डल्यां अङ्किकतानि भवन्ति, इत्थं होराशास्त्रं पूर्वजन्मार्जितकर्मणां फलानि प्रकटयति | यथोक्तं –

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्किकतम् |**

**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ||**

होराशास्त्रे जातकस्य शुभाशुभफलसम्बन्धि विचारः सुक्ष्मतया विधीयते | होराशास्त्रं जीवने प्रचलितस्य समस्तघटनाक्रमस्य यथार्थरुपेण ज्ञानं कारयति | यद्यपि ज्योतिषशास्त्रे मानवजीवनस्य विविधपक्षाणाम् ज्ञानार्थमनेके मार्गाः सन्ति तथापि यादृशं ज्ञानं होराशास्त्रेण भवति तादृशम् अन्येन केनापि शास्त्रेण न



14

भवितुमर्हति | होराशास्त्रदैवज्ञस्य सा दिव्यदृष्टिः भवति यत्- यया सः नरभालपट्टे विधात्रा लिखिताम् अक्षरमालिकां सुगमतया पठितुं शक्नोति | यथोक्तं –

**विधात्रा लिखिता याऽसौ ललाटेऽक्षरमालिकाम् |**

**दैवज्ञस्तां पठेत् व्यक्तं होरानिर्मलचक्षुषा ||**

होराशास्त्रमिदं नरमस्तके लिखितभाग्यलेखस्य प्रकाशनम् अन्धकारावृतसदनस्थितपटादिपदार्थप्रकाशनमिव करोति | जन्मकुण्डलीमाधारीकृत्य शुभाशुभदशान्तर्दशादीनां ज्ञानमवाप्य तदनुकुलवाणिज्यादिकर्मणां शुभसमये यात्रायाः विद्यायाश्च प्रारम्भेण धनादिकस्य मनोरथादेश्च सिद्धिः होराशास्त्रं ज्ञात्वैव भवितुं शक्यते |

होराशास्त्रंमिदं मनुष्याणां धनार्जने साहाय्यं करोति, विपत्समुद्रे नौरिव कार्यं करोति | इत्थं सम्पदि सहायकं, विपदि समुद्धारकं, कृत्याकृत्यप्रवृत्तिनिवृत्तिकारकं सर्वकल्याणञ्च जातकशास्त्रमपाहाय नान्यत् किमपि लोकोपकारकः शास्त्रं विद्यते यत् एतादृशं माहाय्यं कुर्यात् | यथोक्तम् सारावल्याम् –

**अर्थार्जने सहाय पुरुषाणामापदर्णवे पोतः |**

**यात्रसमये मन्त्री जातकमपाय नास्त्यपरः ||**

जगत्यस्मिन् यत्किञ्चिदपि शुभाशुभकर्म अस्माभिः क्रियते तत्सर्वम् होराशास्त्राधीनमेव | यतो हि कृतस्य कर्मणः शुभाशुभव्यञ्जकमिदं शस्त्रं व्यवतिष्ठते | होराशास्त्रे यत्किञ्चिदपि फलं प्रतिपाद्यते तत्सर्वंम् पूर्वकृतकर्मणां परिपाकोऽस्ति | होराशास्त्रातिरिक्तं केनचिदनयेन शास्त्रेण कर्मविषये यथार्थज्ञानं न भवति | अतोऽस्य महत्त्वं स्वत एव सिद्ध्यति |



15

होराशास्त्रस्य मानवजीवने अत्यधिकं महत्वम् उपयोगित्वं च वर्तते | सर्वे जनाः स्वभविष्यज्ञातुं सततमिच्छन्ति | अस्मादेव कारणादस्य स्कन्धस्य सर्वाधिकरूपेण प्रचारो दृश्यते | स्कन्धोऽयं शिशोः जन्मतः मरणपर्यन्तं शुभाशुभफलं प्रकटयन् पिण्डब्रम्हाण्डयोरखिलरहस्यजातं प्रकटीकरोति | यदि कश्चित् दैवज्ञः कस्यचित् मानवस्य उचितप्रकारेण जन्मपत्रं निर्माति तेन सः तस्य जनस्य गुणान् प्रकृतिं च जानाति | दैवज्ञाः जातकपत्रमवलोक्य तस्य जीवने सम्भाव्यघटनानां ज्ञानं पूर्वमेव प्राप्नुवन्ति | विधात्रारिक्तं कुशलदैवज्ञ एव एतत् कार्यं कर्तुं शक्नोति | अनेनैव प्रकारेण जातकः होराशास्त्रमाध्यमेन स्वजीवनस्य समस्तघटनानां ज्ञानं करोति | ग्रहनक्षत्रादिकृद्दोषारिष्टंफलप्रशमनार्थम् ज्योतिषशास्त्रं भूतभविष्यवर्तमान्कालिक-घटनाक्रमस्य परिचयं दत्वा मनुष्यं स्वकर्मानुष्ठातुं पौरुषं च साधनार्थं होराशास्त्रस्य वैशिष्टयं सार्वदेशिकम् सार्वभौमिकम् सार्वकालिकश्चास्ति |

अस्मिन् होराशास्त्रे न केवलं ग्रहाणां शुभाशुभस्थितिवशात् मानवजीवनोपरि तेषां शुभाशुभप्रभावविवेचनमस्ति अपितु अशुभग्रहाणां निर्बलग्रहाणां वा शान्त्योपायाः अपि सम्यक्तया निरूपिताः सन्ति | निर्बलग्रहाणां शान्त्यर्थं मन्त्रप्रयोगः, रत्नधारणं, दानद्रव्याणि, औषधिस्नान-इत्यादि उपायाः होराग्रन्थेषु प्राप्यन्ते | एवं भविष्ये सम्भावितघटनानां ज्ञानं कृत्वा मन्त्ररत्नधारणौषधीस्नानमित्याद्यनुष्ठानैः तेषां घटनानां निराकरणमपि होराशास्त्रेण क्रियते |

**होराशास्त्रविभागः -** ज्योतिर्विद्भिः होराशास्त्रं पञ्चधा विभक्तमस्ति – जातकं, ताजिकम्, रमलम्, प्रश्नः स्वप्नश्चेति | तेष्वपि सर्वातिशयत्वेन जातकस्यैव होराशास्त्रे प्राधान्यं वर्तते, अतः होराशास्त्रं जातकशब्देनापि अभिधीयते |

यथोक्तं कल्याणवर्मणा –

**'जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा |**



16

**अथवा दैवविमर्शनपर्यायः खल्वयं शब्दः ||'**

यत्र जन्मकलग्रहनक्षत्रतिथिराश्यादीन् आधारीकृत्य फलादेशः क्रियते तत्ताजिकम् | यत्र वर्षफलविचारः क्रियते तत्प्रश्नशास्त्रम् | स्वप्नविवेचनेन शुभाशुभफलनिरुपकं स्वप्नशास्त्रम् | एतेषु ताजिकरमलप्रश्नस्वप्नानां फलप्रतिपादनार्थं जन्मलग्नस्य आवश्यकता न भवति | एतेषां ग्रन्थाः अपि पृथगृपेण रचिताः | अतः जातकशास्त्रमेव होराशास्त्रस्य मुख्याङ्गरूपेण परिकल्पितः | अन्येषां ताजिकादीनां तु पृथक् शास्त्रत्वेन गणना कृता | अतः अस्मिन् पाठे मुख्यतया जातकशास्त्रविषये एव लिखितमस्ति | इदानीम् होराशास्त्रस्य अथवा जातकशास्त्रस्य प्रमुखाचार्याणाम् ग्रन्थानां च विषये वर्णनं क्रियते |

- **होराशास्त्रस्य प्रमुखग्रन्थाः ग्रन्थकाराश्च –**

लग्नादिग्रहाऽऽद्यारेण फलादेशप्रक्रिया कदा प्रारम्भा इति तु न ज्ञायते परन्तु एषा प्रक्रिया नितान्तप्राचीना अस्ति इति शास्त्रावलोकनतो ज्ञायते | वाजसनेयीयसंहितायां नक्षत्रदर्शस्य (३०/१०) गणकस्य (३०/२०) चोल्लेखो दृश्यते| एवमेव छान्दोग्योपनिषद्यपि (७/१/२,७/७/१) नक्षत्रविद्यायाः उल्लेखः दृश्यते |

कथ्यते यत् नारदकश्यपवसिष्ठपराशरभृगुप्रभृतिमुनिभिः जातकशास्त्राणि प्रोक्तानि प्रणितानि वा आसन् | सम्प्रति पाराशरभृगुजैमिनीप्रणितत्वेन कतिपय फलितज्योतिषग्रन्थाः लभ्यन्ते परन्तु तेषां रचनाशैली विषयाश्च अर्वाचीना एव प्रतिभान्ति | पौरुषेयग्रन्थेषु वराहमिहिरस्य बृहज्जातकं, लघुजातकं, योगयात्रा, कल्याणवर्मणः सारावलि, केशवस्य जातकपद्धतिः, गणेशदैवज्ञस्य जातकालङ्कारः, वैद्यनाथस्य जातकपारिजातः, ढुण्ढीराजस्य जातकाभरणम्, जीवनाथस्य भावकुतूहलम्, बलभद्रस्य होरारत्नश्च केचन प्रसिद्धाः ग्रन्थाः सन्ति | अथैतेषां संक्षिप्तपरिचयः अस्मिन् पाठे प्रदीयते |

**१. बृहत्पाराशरहोराशास्त्रम्**

बृहत्पाराशरहोराशास्त्रं पराशरमुनिप्रोक्तत्वेन प्रसिद्धः होराग्रन्थः | पराशरमैत्रेयसंवादाधारितः ग्रन्थः पश्चाद्वर्तिना केनापि दैवज्ञेन संगृह्य विलिखितः | मुम्बईतः काशीतश्च प्रकाशितयोः संस्करणयोः महान् पाठभेदः दृश्यते | अस्मिन् ग्रन्थे अष्टनवतिमिताः अध्यायाः सन्ति | ग्रन्थस्य काशीसंस्करण सीतारामाख्येन दैवज्ञेन १८५० अष्टषष्ठ्युत्तरअष्टादशमितश काब्दे सम्पाद्य प्रकाशितः | अस्मिन् ग्रन्थे सर्वेऽपि जातकसम्बन्धविषयाः निरूपिताः |

पाराशरहोराशास्त्रस्य लघुरूपं मध्यमरूपञ्च प्रकाशितं दृश्यते | लघुरुपं लघुपाराशरी उड्डुदायप्रदीपः वा कथ्यते | बृहत्पाराशरहोराशास्त्रस्य वचनानां साररुपेण लघुपराशरीग्रन्थस्य रचना जाताः | यथोक्तं-

**वयं पाराशरी होरामनुसृत्य यथामतिः |**

**उडुदायप्रदीपाख्यं कुर्मो देवमुदां मुदे ||**

लघुपाराशरीरग्रन्थे संज्ञाध्यायः, योगाध्यायः, आयुर्विचाराध्यायः, दशाफलाध्यायः मिश्रकाध्यायश्चेति पञ्चाध्यायाः पञ्चचत्वारिंशत् श्लोकाश्च सन्ति | ग्रन्थोऽयं केन कदा पुनः प्रणित इति तु न ज्ञायते | अस्मिन् ग्रन्थे मुख्यतयाः ग्रहाणां दशाफलवर्णनं कृतमस्ति | इदानीमपि सर्वे ज्योतिर्विदाः अस्य ग्रन्थस्य नियमानुसारेणैव दशाफलानि कुर्वन्ति | वराहमिहिरः स्वकीये बृहज्जातकग्रन्थे शक्तिपूर्वः इति नाम्ना पराशरं स्मरति |

## प्रकरणम्- ५ होराशास्त्रे नवमांशस्य मीमांसा

ज्योतिषशास्त्रे नवांशः अत्यन्तमहत्वपूर्णः वर्गः वर्तते | दक्षिणभारते राशिवर्गं तथा नवांशं समानमहत्वं धारयतः | भूतकाले प्रत्येकरचानाकारेण नवांशवर्गस्य प्रयोगः स्वस्यपुस्तके कृतो वर्तते | ज्योतिषशास्त्रस्य विख्यातलेखकेभ्यः नवांशाधारित पुस्तकानि लिखितानि | उदाहरणानि यथा – जैमिनिपद्धतिः , कालचक्र–दशा-



18

सर्वतोभद्रचक्र  इत्यादि | नवांशाधारितं गद्यं किदृक् विशालं वर्तते तस्य ज्ञानं तत्रस्थश्लोकाणां समन्वयेन  ज्ञायते | ग्रन्थेस्मिन् ३०००सहस्राधिकसंख्याकाः श्लोकाः सन्ति |

मन्त्रेश्वरानुसारं बहुनां लेखकानां मतेषु नवांशवर्गपरिणामं राशिवर्गस्य समानमेव भवति | केषाञ्चित् लेखकानां मते नवांशवर्गः – राशिवर्गात् अत्यधिकं महत्वपूर्ण: वर्तते |

यथा – **"स्वोच्चे नीचांशगे दु:खी नीचे स्वोच्चांशगे सुखी"**

सूर्यः मेषराशौ तथा तुलायां नवांशे उच्चतासम्बन्धितशुभफलं न ददाति | तत् विशेषं सूर्यः तुलाराशौ तथा मेषनवांशे अत्यन्तशुभाफलं ददाति |

"प्रायो नवांशेऽखिल " तथा "जातकफलं नवांशे "(मानसागरी) अर्थात् जीवनसम्बन्धितः समेऽपि पर्यायानामध्ययनं नवांशे वर्गद्वारा भवति | पदद्वयस्य लेखकमानापटले , ४० वर्षादधिकं प्रभावः स्थितः | कालेऽस्मिन् नवांशवर्गसम्बन्धितसामग्री लेखकद्वारा बहुभ्यः स्तोत्रेभ्यः एकत्रिता | (मुख्यतः देव केरलान् तथा नाडी सिद्धान्तं ) अस्या सामग्र्याः समन्वयरूपमिदं पुस्तकम् |

यदि एतेषां नवांशसिद्धान्तानां ध्यानपूर्वकमध्ययनं तथा प्रयोगः क्रियते चेत् जातकस्य जीवनसम्बन्धितघटनानां भविष्यकथनं विना भ्रमेन कर्तुं शक्यते | अस्य सन्दर्भे भागप्रथमे व्याख्यापितसिद्धान्तानां ध्यानपूर्वकमध्ययनं तथा कुण्डल्याम् एतेषां सफलप्रयोगः आवश्यकः भवति |

पराशरी षोडशवर्गेषु नवांशाय अत्यधिकं महत्वं किमर्थं प्रदत्तम् ?

प्रत्येकनवांशः तथा प्रत्येकनक्षत्रस्य एकचरणस्य सम्पूर्णः योगः ३ अंशाः २० कला च भवन्ति | अतः नवांशवर्गः षोडशवर्गेषु महत्वपूर्णः वर्तते | दक्षिणभारते कोऽपि ज्योतिर्विद: राशिवर्गस्याध्ययनं नवांशवर्गेण विना न करोति | बहवः



19

ज्योतिर्विदाः नवांशवर्गं राशिवर्गात् अधिकः महत्वपूर्णं कथयति, कारणं राशिवर्गे नीचस्थग्रहाः नवांशे उच्चस्थाः भवति, ते शुभफलशुभपरिणामदायकाः भवन्ति |

ग्रहाणामंशकबलम्

**विंशोपकः :-**

विंशोपके प्रत्येकग्रहेभ्यः विंशत्यङ्केषु पूर्वनिर्धारिताः अङ्काः प्रदत्ताः | राशिवर्गाय ६ अङ्,काः नवांशाय ५ अङ्,काः द्रेष्कोणाय ,४ अङ्,काः होरा तथा द्वादशाय द्विरङ्काः प्रदत्ताः सन्ति |

(३) नवांशवर्गः ग्रहाणां स्थितेः अत्यन्तसटीकं रूपं प्रस्तौति | यथा – यदि मीनलग्नस्य सूर्यः नवांशे वर्गोतमः स्यात् चेतस्य स्पष्टः अर्थः भवति सूर्यस्य रेखांशः ११५२६४० तः १२५०००० अस्य मध्यम स्यादिति |

(४) राशौ तथा नवांशे राशिस्वामी एकमेव स्थास्यति |

(५) नवांशतुल्यराशिः तथा राशितुल्यनवांशस्य प्रयोगः केवल नवांशवर्गे एव क्रियते |

- सार एव

1. नवांशवर्गः मेरु४५ तथा राशिवर्गः देहोऽस्ति |
2. नवांशवर्गः फलं तथा राशिवर्गः वृतमस्ति |
3. नवांशवर्गः अन्तरदशा तथा राशिवर्गः महादशा विद्यते |
4. नवांशवर्गः सुक्ष्मविभागं तथा राशिवर्गः स्थूलविभागं वर्तते |

उदाहरणार्थं लेखकस्य जन्मकुण्डली



20




लग्नम् = ९२-५३, मङ्गल: = १२७-९, शुक्र = २८३-१४, सूर्यः २५६-१०, बुध: = २६५-१३, शनि: = ८०-४२ (वक्री ), नेप्च्युन: = ९९०-१३, चन्द्र: = १९२-१३, गुरु: = ३२९-२९, राहु: = २६७-०६ | जन्मदिनाङ्कः- ३१-१२-१९१५

DOB = 31-12-1915

सर्वाष्टकवर्गः




शेषराहुदशा = १० वर्ष: ६ मासाः उदिताः | सरलार्थम् अत्र गोलाकारसारणी प्रस्तुतोऽस्ति | चक्रस्य बहिर्वृत्तः राशीसूचकोऽस्ति | नवांशः तथा राश्यङ्कानां माध्यमेन प्रस्तूयते | राशिषु अङ्कः (१)मेषः (२)वृषभः (३)मिथुनः (४)कर्कः इत्यादि राशिणसूचकाः सन्ति |



21

प्रत्येकराशिः अंशत्रये, २० कलायाः नवभागेषु विभाजिताः | १३ अंशाः २० कलायुक्तप्रत्येकनक्षत्राणि चतुर्षु भागेषु विभाजितः | प्रत्येकनक्षत्रचरणम् इदं उच्यते |

उदाहरणकुण्डल्यां लग्ने कर्कराशिः तथा कन्यानवांशयुक्तः वर्तते | (३-८-५३ )सारणौ लग्नं चिन्हमाध्यमेन प्रस्तौति | तथैवान्य ग्रहाणां स्थित्यपि सारणिमध्ये प्रदत्ता वर्तते | अत्र १०८ नवांशान् दर्शयिताः | सारणौ जातकः नातिदीर्घकाले एवं ग्रहस्य राशिनक्षत्रम्, चरणं, नवांशराशिज्ञातुं शक्यते | मम मते नवांशवर्गाध्ययनाय गोलाकारसारणी आवश्यकी वर्तते |

गोलाकार सारणी




नवांश – वर्गगणना

गर्ग जातके-

**मेषकेसरीपापानां मेषाद्या नवांशकाः |**

**वृषकन्यामृगाशाश्च मकराद्या नवांशकाः ||**

**तुलामिथुनकुम्भानां तुलाद्या नवभागकाः |**

22

## कर्करालिझषाणाम् च कर्कराद्या नवांशकाः ||

- मेष-सिंह-धनुराशिषु नवांशगणना मेषतः प्रारभ्यते |
- वृषभ-कन्या-मकरराशिषु नवांशगणना मकरराशितः प्रारभ्यते |
- मिथुन-तुला-कुम्भराशिषु नवांशगणना  तुलाराशितः प्रारभ्यते |
- कर्क-वृश्चिक-मीनराशौ नवांशगणना कर्कराशितः प्रारभ्यते |

नवांश सारणिः –कोष्टकम्

| अंश ↓ राशि → | मेष | वृषभ | मिथुन | कर्क | सिंह | कन्या | तुला | वृश्चिक | धनु | मकर | कुंभ | मीन |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 0°–3°20' | ① | 20 | 7 | ④ | 1 | 10 | ⑦ | 4 | 1 | ⑩ | 7 | 4 |
| 3°20'–6°40' | 2 | 11 | 8 | 5 | 2 | 11 | 8 | 5 | 2 | 11 | 8 | 5 |
| 6°40'–10' | 3 | 12 | 9 | 6 | 3 | 12 | 9 | 6 | 3 | 12 | 9 | 6 |
| 10°–13°20' | 4 | 1 | 10 | 7 | 4 | 1 | 10 | 7 | 4 | 1 | 10 | 7 |
| 13°20'–16°40' | 5 | ② | 11 | 8 | ⑤ | 2 | 11 | ⑧ | 5 | 2 | ⑪ | 8 |
| 16°40'–20° | 6 | 3 | 12 | 9 | 6 | 3 | 12 | 9 | 6 | 3 | 12 | 9 |
| 20°–23°20' | 7 | 4 | 1 | 10 | 7 | 4 | 1 | 10 | 7 | 4 | 1 | 10 |
| 23°20'–26°40' | 8 | 5 | 2 | 11 | 8 | 5 | 2 | 11 | 8 | 5 | 2 | 11 |
| 26°40'–30° | 9 | 6 | ③ | 12 | 9 | ⑥ | 3 | 12 | ⑨ | 6 | 3 | ⑫ |

अंकः १ तः १२ राशिसूचकाः सन्ति | गोलाकार-अङ्कः वर्गोत्तमनवांशस्य  सूचकः |

उदाहरणकुण्डल्यां नवांशः ३५७०५३ युक्तोऽस्ति | कर्कराशौ तृतीयनवांशः कन्या राशियुक्तः भविष्यति | सूर्यः ८५ १६ १० इत्यस्य पञ्चनवांशः वर्गोत्तमः भवति| चन्द्रः तुलाराशौ ६ १२ १३ इत्यस्य चतुर्थनवांशयुक्तः भवति तुलातः चतुर्थनवांशः मकरराशियुक्तः भवति | अनया रीत्या चन्द्रः नवांशे मकरराशौ स्थितः भवति | मंगलः सिंहराशौ ४५७०९ तृतीयनवांशयुक्तः भवति | सिंहराशेः तृतीयनवांशः मिथुनराशौ स्थितः भविष्यति | अनया रीत्या नवांशे भौमः मिथुनराशौ स्थितः भविष्यति | बुधः २५ १३ इत्यस्य अष्टमनवांशयुक्तः वृश्चिकराशौ स्थितः भवति | बृहस्पतिः १० २९ २९ इत्यस्य अन्तिमनवांशयुक्तः भवति | अयं नवांशवर्गे  कुम्भराशौ स्थितः भवति | अयं नवांशवर्गे कुम्भराशौ स्थितः भवति |



23

शुक्रः ९५ ३० १४ युक्तः चतुर्थनवांशस्य वर्तते | नवांशवर्गे शुक्रः मेषराशौ स्थितः भवति | शनिः २५ २० ४२ इत्यस्य सप्तमनवांशयुक्तः भवति | अनेन प्रकारेण नवांशवर्गे शनिः मेषः राशौ स्थितः भवति | अनया रीत्या राहुः तथा केतुः, मिथुन तथा धनुः नवांशे स्थितः भवति |

नवांशवर्गः उदाहरणकुण्डली




## नवांशवर्ग-अध्ययनम्

सर्वप्रथमं पाठकः पुस्तकस्य एकभागस्य ध्यानपूर्वकमध्ययनं क्रियते येन वर्गाध्ययनसम्बन्धि–विभिन्न सिद्धान्तानां ज्ञानं कर्तुं शक्यते |

1. शुभांश: – शुभांशात् अधिकः ग्रहः शुभपरिणामदायकः भवति |
2. ग्रहस्थितिः – ग्रहाः वर्गे उच्चः स्वराशियुक्ताः, मित्रराशियुक्ताः वा नीचराशियुक्ताः वा शत्रुराशौ स्थिताः भवन्ति |

## प्रकरणम्. ६– नवमांश प्रतिपाधविषयसमीक्षा

प्रस्तावना



24

भारतीयज्योतिषशास्त्रम् आद्यष्टादशज्योतिर्धरैः निर्मापितमस्ति | अद्यापि तस्मिन् लघु-गुरु त्रुटयः न दृश्यन्ते | तदेव अष्टादशज्योतिर्धराः दैवीशक्त्याः स्वरुपं ज्ञापयति |

आधुनिक ज्योतिषं तथा प्राचीनज्योतिषम् एतादृशाः भेदाः ज्योतिषशास्त्रे न सन्ति या आद्यसिद्धान्ताः अद्यापि परिप्रेक्षाः परिवर्तनेन विषयस्य मूल्याङ्कनं कर्तुं सक्षमाः अनन्याश्च सन्ति |

उत्तरभारते, दक्षिणभारते, पूर्वभारते, पश्चिमभारते वा मध्यभारते च द्रश्यामः चेत् भारतखण्डस्य एकापि दिशा तादृशी नास्ति यत्र एकोऽपि ज्योतिर्विदः नास्ति | सर्वत्र ज्योतिर्विदास्तु वर्तन्ते एव |

ज्योतिषविद्या ईश्वरीय विद्या वर्तते | अस्याः विद्यायाः बुधाः देवज्ञाः सन्ति | एभिः देवज्ञैः कुण्डलीनां, राशिनां, नक्षत्राणां च नैकवारं विभाजनं कृत्वा नैकवारं संयोजनं च कृत्वा ग्रहाणां, भावानां परिप्रेक्षे च जीवनस्य सत्यता कुण्डल्याः आधारेण अद्भूतरीत्या ज्ञापितः |

दक्षिणभारते एकराशेः ३० अंशाः भवन्ति, किन्तु इयं राशिं ते प्रकृतिजन्य परिवर्तनं विचारयितुं एकं विशालं क्षितिजं च दानाय १५० नाडीषु विभाजितवन्तः | तथा तैः ज्योतिषशास्त्रे नाडी-ज्योतिषस्य विश्लेणात्मकः अभ्यासः प्रस्तुतः |

दक्षिणभारते विविधाः तथा विविधविषयोपरि ज्योतिषशास्त्रस्य ग्रन्थाः उपलभ्यन्ते | तानेव ग्रन्थान् वयं उत्तरभारते संहिताग्रन्थाः इति जानीमः | एतदेव विषयवस्तुं सम्यक् रीत्या दक्षिणभारतस्य विचक्षणज्योतिर्विद्भिः नाडीपरत्वविचारं कृत्वा अस्मान् सुगमरीत्या ज्ञापयितुं प्रयत्नः कृतः |

वयं द्रक्ष्यामः चेत् दक्षिणभारत-उत्तरभारतयोः ग्रहाणां, राशिणां भावानां गुणधर्माः तथा विषयाः च भारतस्य प्रचलितज्योतिषात् किञ्चिदपि भिन्नाः नास्ति | तथापि नाडी शब्दं श्रवणेनैव उत्तरभारतस्य ज्योतिषरसिकेषु नैकाः प्रश्नाः कौतुकेन सह उद्भवन्ति | कारणं उत्तरे भारते यत् ज्योतिषं



25

अस्मान् जन्मतः परिवेषितमस्ति, तस्मिन् नाडी शब्दाभावेन एतादृशं भवत्येव|

नाडीं विज्ञाय ज्योतिषशास्त्रे अग्रे एधामहे तदा समग्रभारते उत्तरे, दक्षिणे, पूर्वे च अस्माकं अष्टादशज्योतिर्धरैः यत् किमपि दत्तमस्ति, तत् सर्वत्र समानमेव वर्तते | तस्मिन् भारतभागपरिवर्तनेन कोऽपि भेदो न भवति इति सरलतया ज्ञापयति |

दक्षिणभारते नान्दीनाडी, अगस्त्यनाडी, भृगुनाडी एते नाडीग्रन्थाः खलु किन्तु उत्तरभारते नंदीसंहिता, अगस्त्यसंहिता, भृगुसंहिता नाम्ना विख्याताः सन्ति | परिप्रेक्षेऽस्मिन् १८ आद्यज्योतिर्विदेभ्यः अनु प्रथमक्रमे आगन्तस्य सत्याचार्यस्य नाडीग्रन्थेषु नाडीविषये स्पष्टिकरणं प्रदत्तमस्ति |

अत्र दीपमानेषु विषयवस्तुषु सत्याचार्यस्य ध्रुवनाडी मूलग्रन्थमाधारीकृत्य विषयोऽयं ज्ञापनाय भूरीशः प्रयत्नः विहितः वर्तते |

अतएव वर्णनमिदं विषयवस्तुञ्च पूर्णतया प्रपद्य नाडीनामर्थानां सार्थक्यं ज्ञात्वा जन्मकुण्डल्याः १२ राशयः, १२ भावाः तथा समेषां ग्रहाणां परिप्रेक्ष्ये तुलनां करिष्यन्ते तदा मे नाडी विषयकार्यं सफलम् इत्यहं मन्ये |

**नाडी परिचयः**

यथा वयं कुण्डल्यां राशि, अंशः, कला, विकलानामुपरि राशि-भाव-ग्रहाणां प्रमाणं निष्कास्य तस्याधारेण गणितकार्यं कृत्वा फलादेशविषये विचारं कुर्मः तयैव रीत्या नाडयः अपि राशेः एकः कालात्मकः स्वरुपं वर्तते | दक्षिणभारतेः राशेः अभ्याशाय तस्य कलात्मकभागः नाडीतः कुण्डलिनां फलादेशीयः विचारः क्रियते |

नाडीं जन्मकुण्डल्याः राशिं प्रमानायक(मापनाय) एकस्य सुक्ष्मभागरित्या विचार्यते | नाडी जन्मकुण्डल्याः राशेः १५०तमो भागः वर्तते| वयं गणितिकरीत्या जानीमः चेत्

एकाराशि = ३० अंशाः |

26

एक-अंश = ६० कला |

राशेः उपरोक्तकोष्टकात् वयं परित्यक्ताः स्मः | अधुना दक्षिणभारते नाडीं राशेः १५०तमो भागः गण्यते , तत् न्याये –

एका राशि: = १५० नाडी |

एका राशि: = ३० अंशाः |

एका राशि: = ३० x ६० कलाः ,अतः

एका राशि: = १८०० कलाः |

१८०० कला = १५० नाडयः

एका नाडी – १२ कलाः तस्मात्

एका नाडी १२ कलायाः भवति | एकराशौ १५० नाडयः भवन्ति |

नाडीनां क्रमः

नाडीग्रन्थेषु १५०नाडीनां क्रमः अधोलिखितानुसारं वर्तते |

| | | | |
|---|---|---|---|
| 1 | वसुधा | 76 | सुशीतला |
| 2 | वैष्णवी | 77 | सुखदा |
| 3 | ब्राह्मी | 78 | सुप्रभा |
| 4 | कालकय | 79 | शोभा |
| 5 | शाङ्करी | 80 | शोभना |
| 6 | सुधाकरी | 81 | शिवदा |
| 7 | समा | 82 | शिवा |
| 8 | सौम्या | 83 | बला |
| 9 | सुरा | 84 | ज्वाला |

| | | | |
|---|---|---|---|
| 10 | माया | 85 | गदा |
| 11 | मनोहरा | 86 | गाधा |
| 12 | माध्वी | 87 | नूतना |
| 13 | मञ्जुस्वना | 88 | सुमनोहरा |
| 14 | वेरा | 89 | शोभावली |
| 15 | कुम्भिनि | 90 | सोमलता |
| 16 | कुटिला | 91 | मणका |
| 17 | प्रभा | 92 | मुद्रिका |
| 18 | परा | 93 | क्षुधा |
| 19 | पयस्विनी | 94 | मोक्षाय वर्गः |
| 20 | माला | 95 | वलया |
| 21 | जगती | 96 | नवनीता |
| 22 | जर्जरा | 97 | निशाचारी |
| 23 | ध्रुवा | 98 | निवृतिः |
| 24 | मुसला | 99 | निगदा |
| 25 | मुग्धरा | 100 | सारा |
| 26 | पाशा | 101 | सङ्गीता |
| 27 | चम्पका | 102 | सामदात |
| 28 | दामाङ्का | 103 | समा |
| 29 | मही | 104 | विश्वम्भरी |
| 30 | कलुषा | 105 | कुमारी |
| 31 | कमला | 106 | कोकिला |



28

| | | | |
|---|---|---|---|
| 32 | कान्ता | 107 | कुञ्जरावृत्तिः |
| 33 | काला | 108 | एन्द्रा |
| 34 | करिकला | 109 | स्वाहा |
| 35 | क्षमा | 110 | स्वरा |
| 36 | दुर्धरा | 111 | वह्नी |
| 37 | दुर्मगा | 112 | प्रीता |
| 38 | विश्वा | 113 | रक्षजलाप्याला |
| 39 | विशीर्ना | 114 | वारुणी |
| 40 | विकटा | 115 | मदिरा |
| 41 | आविला | 116 | मैत्री |
| 42 | विभ्रमा | 117 | हारिणी |
| 43 | सुखदा | 118 | हरिणी |
| 44 | स्निग्धा | 119 | मरुतः |
| 45 | सोदरा | 120 | धनञ्जयः |
| 46 | सुरसुन्दरी | 121 | धनकारी |
| 47 | अमृतप्लाविनी | 122 | धनदा |
| 48 | काला | 123 | अम्बुजा |
| 49 | कामधुक् | 124 | कच्छपा |
| 50 | करविरिणी | 125 | शूलिनी |
| 51 | गह्वरा | 126 | रौद्री |
| 52 | कुदिनि | 127 | शिवा |
| 53 | रौद्रा | 128 | शिवकरी |

## प्रकरणम् ७- नवमांशे समीक्षात्मकं मुल्याङ्कनम्

६४तम नवांश:, अध्याय: ५

ज्योतिषशास्त्रसम्बन्धिग्रन्थेषु गोचरस्य अध्ययनं भिन्न-भिन्नपर्यायिभिः क्रियते | सामान्यतः चन्द्रस्य स्थितिसन्दर्भे बृहस्पतिशनिराहुकेतुप्रभृतिग्रहाणां गोचरस्थितेः अध्ययनं भवति |

ज्योतिषग्रन्थेषु यथा देवकेरलम्, बृहद्पाराशर:, होराशास्त्रम्, जातकपारिजातम्, होरारत्नम्, प्रश्नमार्ग:, जातकदेशमार्ग: तथा अन्य ग्रन्थेष्वपि कानिचन चिह्नाऽऽधारेण शनेः गोचरम् औदास्यं तथा कदाचन आकस्मिकमृत्योः सूचकः भवितुमर्हति | अनेन प्रकारेण एकं चिह्नम् अस्ति ६४ तम नवांशः (३ २० अथवा भयक्रस्य २०० ) चन्द्रनवांशात् वा उदितनवांशात् | अत्र लेखकः ६४तम नवांशसम्बन्धि केचन अद्भुतपर्यायाणां वर्णनं करोति | ६४तम नवांशः वास्तविकरीत्या कुण्डल्यां २१० अर्थात् अष्टमभाव-प्रभावस्य सूचक: अस्ति |

प्रत्येकग्रह: यस्मिन् नवांशे स्थितो भवति तस्मात् अष्टमराशौ सः एव नवांशः ६४तम नवांशस्य सूचकः अस्ति | उदाहरणतः यदि मेषराशौ ८-३० युक्त कोऽपि ग्रहः भवति तर्हि सः मेषराशौ तृतीयनवांशयुक्तः भविष्यति | अस्य ६४तम नवांशे मेषराशितः अष्टमराशि वृश्चिके तृतीयनवांशे भविष्यति |अन्य प्रकारेण कथयामरचेत् यदि मेषराशौ कोऽपि ग्रहः ६-४० तः १०-००पर्यन्तः भविष्यति | ६४ अस्य १२ द्वारा विभाजनं कुर्वन्ति शेषभागसंख्या ४ आगच्छति अनेन प्रकारेण ६४ नवांशः | नवांशवर्गे ग्रहस्थितितः चतुर्थराशौ स्थितः भविष्यति | उदाहरणरूपेण उपरोक्त उदाहरणे ग्रहः मेषराशौ तथा मिथुननवांशे स्थितः अस्ति | तथैव ६४तम नवांशराशी वृश्चिके कन्या भविष्यति | ६४ नवांशं भिन्न-भिन्न लेखकैः भिन्न-भिन्नरूपेण



30

वर्णितमस्ति | यथा जातकपारिजातग्रन्थे अस्य वर्णनं चन्द्रात् बृहत्पराशरहोराशास्त्रे अस्य वर्णनं चन्द्रसूर्यलग्नाच्च भवति |

**१ जातकपारिजातः, अध्यायः ५, श्लोकः ५६**

**विलग्नजन्मद्रेष्काणाद्यस्तु द्वाविशंतिः खरः |**

**सुधाकरोपगांशक्षति चतुः षष्ठ्यंशको भवेत् ||**

**खरद्रेष्कोणनवांशः**

लग्नेशः यस्मिन् द्रेष्कोणे स्थितो भवेत् तस्मात् २२तम द्रेष्कोणः खरः कथ्यते | चन्द्रः यस्मिन् नवांशे स्थितः भवेत् तस्मात् ६४तम नवांशः खरनवांश: कथ्यते | केचन अन्य लेखकाः यथा वैद्यनाथः तथा गणपतिमुनि इत्यादिनां मतानुसारं खरद्रेष्काणः लग्नात् तथा ६४तम नवांशः चन्द्रात् ज्ञातव्यः |

श्री दिवाकरुणिवैकटसुब्बारावनामाधिधस्य हैदराबादनगरस्य विख्यातविदुषः मतानुसारं "The souvenir of A"India Astrological conference". पत्र क्रमाङ्कः ३१तः उद्धृतः –

"गणपतिमुनिद्वारा स्वरग्रहः अर्थात् स्वरद्रेष्कोण-अधिपतिः २२तम द्रेष्काणस्वामि लग्नात् तथा स्वरनवांश-अधिपतिः ६४तम नवांशचन्द्रात् ज्ञात्वा तदुपरान्तरोचकविषयप्रस्तुतिः कृता वर्तते |"

यदा कदापि जन्मकुण्डल्यां चन्द्रस्थितितः २२तम द्रेष्काणस्वामि तथा ६४तम नवांशस्वामि समानग्रहः भवेत् अथवा यदा ग्रहद्वयं अष्टवर्गे शोधनद्वयोपरान्त बिन्दुरहितस्थाने गोचरे भ्रमणं करोति तथा तस्याः कक्षायाः स्वामित्वस्वरग्रहं प्राप्नोति तर्हि मृत्युः सम्भावित अस्ति | इदं परिणामं मया बहु वर्षानुभवात् प्राप्तम् | तथा इदं सटिकपरिणाममपि ददाति |



31

**जातकपारिजातः, अध्यायः ५, श्लोकः ५२-५३**

**रन्धेश्वरो रन्ध्रयुक्तो रन्ध्रद्रष्टा खरेश्वरः |**

**रन्ध्राधिपयुतश्चैव चतुः षष्ठ्यंशनायकः ||**

**रन्धेश्वरति शत्रुश्चसप्तछिद्रग्रहाः स्मृताः |**

**तेषां मध्यबलीयस्तु तस्य दाये मृतिं वदेत् ||**

- **छिद्रग्रहः**

निम्नाङ्किताः सप्तग्रहाः "छिद्रग्रहाः" इति नाम्ना ज्ञायन्ते |

१.अष्टमेशः |

२.अष्टमभावस्थितग्रहः |

३.अष्टमभावोपरिदृष्टिप्रभावयुक्तग्रहः |

४.लग्नात् २२तम द्रेष्कोणस्वामी-स्वरः |

५.अष्टमेशात् युतियुक्तः ग्रहः |

६.चन्द्रात् ६४तम नवांशस्वामी |

७.अष्टमेशस्य अतिशत्रुग्रहः |

जातकस्य मृत्युः उपरोक्तग्रहाणां मध्ये सर्वाधिकबलिष्ठग्रहस्य दशान्तर्गतभवितुं शक्नोति |

जातकदेशमार्गः अध्यायः ७ श्लोकः २९

**जन्मनि लग्नोपगताच्चन्द्रोपगान्नवांशकद्वाऽपि |**

**चतुरुत्तरषष्ठ्यंशक्रमे लग्ने वा समादिशेन्मरणम् ||**

- **मृत्युकाले चन्द्रस्थितिः**



32

गोचरे यदा चन्द्रः उदितनवांशात् वा चन्द्रात् ६४तम नवांशे गोचरः करोति तस्मिन् समये जातकस्य मृत्युः भवितुं शक्नोति |

जातकदेशमार्गग्रन्थस्य लेखकानुसारं ६४तम नवांशः लग्नचन्द्रयोश्च ज्ञातव्यः | उपर्युक्तश्लोकानुसारं मृत्युः ६ तः ७ होरा मध्ये भवितुं शक्नोति | अत्र चन्द्रगोचरः महत्त्वपूर्णमपितुं घण्टाद्वयं स्वीकरोति | अर्थात् पूर्वीयक्षितिजे उदितनवांशस्य कालः|

**बृहद्पराशरहोराशास्त्रम्, अध्यायः २० श्लोकः ९९**

**जन्मलग्नेन्दुगा नन्दभागा क्रमाद्वेदष्ठ्यंशराशौ प्रयाते तनौ |**

**मृत्युजन्माङ्गनीचोदये शून्यगे दुष्टपाकोदये देहमुक्तिः भवेत् ||**

- **मृत्युसमये उदितराशिः**

१.यदा लग्नतः अथवा चन्द्रात् ६४ तम नवांशराशिः उदितः भवति |

२.अष्टमात् सप्तमभावराशिः अर्थात् द्वितीयभावराशि उदितः भवति |

३.लग्नात् सप्तमभावराशिः उदितः भवति |

जातकः अस्मात् जीवनात् पलायनं करोति यदि उपरोक्त वर्णित राशितः कोऽपि राशिः लग्नेशस्य अष्टवर्गमध्ये बिन्दुरहितः (न्युनबिन्दुयुक्तः भवेत् ) तथा दशा अपि विपरितपरिणामदयिका भवेत् |

**(4) प्रश्नमार्गः अध्यायः १९ श्लोकः ६**

**चन्द्रांशेशस्य तद्भूषा नवांशेशोऽथवा रवेः |**

**लग्नेशो वाऽपि यद्येव स्वल्पमध्यविरायुषः ||**



33

* **आयुनिर्णयः**

यदि चन्द्रनवांशस्वामिः ६४तम नवांशस्वामेः शत्रुः, समः अथवा मित्रं भवेत् तर्हि जातकायुः अल्पः मध्यमः अथवा पूर्णः भविष्यति |

एतादृशम् अध्ययनं लग्न नवांशस्वामेः तथा ६४तम नवांशस्वामेः तथा सूर्यः नवांशस्वामेः तथा ६४तम नवांशस्वामेः अपि कुर्वन्ति | एतादृशेन अध्ययेन प्रश्नशास्त्रस्य लेखकेन अन्यलेखकानाम् उपरि वरीयता प्राप्ता वर्तते |

**होरारत्नम्, अध्याय- ८ श्लोकः २७**

**जन्मलग्नांशकात् च्चन्द्रनवांशादथ वाऽपि वा |**

**राहौ चतुःषष्ठीमिते निधनं च विनिर्दिशेत् ||**

* **मुत्युसमये राहुग्रहस्य स्थितिः |**

यदा राहुः उदितनवांशात् अथवा चन्द्रनवांशात् ६४तम नवांशात् अथवा चन्द्रनवांशात् ६४तम नवांशे गोचरः करोति तदा मुत्यु भवितुं शक्नोति |

टिप्पणि: – बलभद्रानुसारं यदा राहुः लग्नात् अथवा चन्दात् ६४तम नवांशे गोचरः करोति तदा जातकस्य मारूद्याभ्यान्तरे मुत्युः भवितुं शक्नोति |

**जातकपारिजात:, अध्याय ५ श्लोक ८५**

**भुक्त्यंशपो भानुसुतेन युक्तो दुस्थानगो वा विषभक्षणेन |**

**सहाहिना वा शिखिना च तस्य मुत्युभवेद्रज्जु निबन्धनेन ||**

**मुत्युः केन प्रकारेण भवितुं शक्यते इति विषयस्य विश्लेषणम्**

यदा लग्नात् ६४तम नवांशस्वामी दुष्टस्थाने अर्थात् ६, ८,१२ स्थाने स्थितो भवेत् तथा निम्नग्रहाणां युतीर्भवेत् तर्हि –

(१) शनिजातकस्य विषयानेन मुत्युः भवति |

(२) राहु अथवा केतुद्वारा रज्जुनिबन्धनेनमुत्युः भवति |



34

टिप्पणि: – अत्रापि बेङ्गलुरु तथा काशीप्रकारेण अनुचित अनुवादं कृतमस्ति | उदाहरणतः भुक्तायंश अर्थात् दशमनवांशः | भुक्ति: – भू (५) तथास्ति (६) कटपयादि-अनुसारेण अर्थात् ६४तम नवांशस्य स्वामी |

**उदाहरणम् १. नथ्थुरामगोडसे (पृष्ठ – ३८३ ) (Notable Horoscopes )**

**जन्मतथा = जन्म 19/05/1978 प्रातः – ०८ – २९ ( G5.7)**




**जातकपारिजात:, अध्यायः ५ श्लोकः ८५**

**द्वितियसिद्धान्तः** –अस्यां कुण्डल्यां लग्नात् ६४तम नवांशमीनराशिः मिथुनराशौ अस्ति | जन्मकुण्डल्यां मिथुनस्वामिबुधः तथा राहुग्रहस्य युतिः द्वादशभावे अस्ति | सर्वविदित् अस्ति यत् नथ्थुरामगोडसे महोदयस्य मुत्युः १५/११/१९४९ तमे वर्षे रज्जुनिबन्धनेन अभवत् |



35

**उदाहरणम् – ०२ जुल्फ़िकार अली भुटटो (पाकिस्तानदेशस्य नेता तस्य मुत्युदण्ड: १८/०३/१९७८ तमे वर्षे लाहोरनगरस्य न्यायालयेन दत्तः ) पृष्ठ ६१९ अगस्त १९७८ एस्टोलोजिकल मेगेजिन |**

**जन्मतथिः – ०५/०१/१९२८**

**सायं – ०५:०३ (G.S.T.)स्थलम् – लखनऊ (सिंघ ) २७.33.उत्तर ६८ २५ पूर्व.**

## सन्दर्भग्रन्थसूची

| क्रमा. | ग्रन्थनाम | लेखक/प्रकाशन/अनुवादक/सम्पादकादि | प्रकाशनम् |
|---|---|---|---|
| १ | भारतीयज्योतिष-शास्त्रस्येतिहासः | आचार्य लोकमणि: दाहाल: | चौखम्बा सुरभारति-प्रकाशन, वाराणसी |
| २ | लधुपाराशरी | डो.उमेशपुरी 'ज्ञानेश्वरः' | १९९२. रणधीर प्रकाशन, हरिद्वार |
| ३ | भारतीयज्योतिष: | श्री शङ्कर बालकृष्ण दीक्षितः | १९५७ हिन्दीसमिति उत्तरप्रदेश, लखनऊ |
| ४ | लधुजातकम् | डो. कमलाकान्तपाण्डेय: | १९८१ चौखम्बा सुरभारति-प्रकाशन वाराणसी |



36

| | | | |
|---|---|---|---|
| ५ | जातकतत्त्वम् | डो. सुरेशचन्द्रमिश्रः | १९८८ रञ्जनप्रकाशन, नई दिल्ली |
| ६ | ज्योतिकरत्नाकर: | देवकीनन्दनसिंहः | १९३४ मोतीलाल बनारसीदास, वाराणसी |
| ७ | ज्योतिषदर्शन: | डो. चन्द्रशेखरठकुर: | १९९९ महादेवराम-चन्द्रजागुष्टे, अहमदावाद: |
| ८ | ज्योतिषश्याम-संग्रहः | पण्डितश्यामलालदैवज्ञ: | १९६२ लक्ष्मीवेन्कटेश्वर कल्याण -मुंबई |
| ९ | ज्योतिषकल्पतरु: | जोशीसोमेश्वरद्वारकादास: | १९९० शिवज्योतिष कार्यालय - मुंबई |
| १० | उत्तरकालमृत: | जगन्नाथमसीन: | २००१ रञ्जनम प्रकाशन, नई दिल्ली |
| ११ | ज्योतिषशास्त्रम् | रमेशरतिलाल: शाहः | २०१० श्री हरिहर पुस्तकालय:, सुरत |



37